योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १६३

त्रिषष्ट्यधिकशततमः सर्गः १६३

श्रीराम उवाच ।

विनेन्द्रियजयेनेदं नाज्ञत्वमुपशाम्यति ।

तदिन्द्रियाणि जीयन्ते कथं कथय मे मुने ।। १

श्रीवसिष्ठ उवाच ।

न च प्रभूतभोगेषु न पुंस्त्वे न च जीविते ।

न चेन्द्रियजयोन्मुक्तौ दीपस्तनुदृशो यथा ।। २

तदिन्द्रियजये युक्तिमिमामविकलां श्रृणु ।

सिद्धिमेति स्वयत्नेन सुखेन तनुरेतया ।। ३

चिन्मात्रं पुरुषं विद्धि चेतनाज्जीवनामकम् ।

यच्चेतति स जीवोऽन्तस्तन्मयो भवति क्षणात् ।। ४

संवित्प्रयत्नसंबोधनिशिताङ्कुशकर्षणैः ।

मनोमतङ्गजं मत्तं जित्वा जयति नान्यथा ।। ५

चित्तमिन्द्रियसेनाया नायकं तज्जयाज्जयः ।

उपानद्गूढपादस्य ननु चर्मावृतैव भूः ।। ६

संविदं संविदाकाशे संरोप्य हृदि तिष्ठतः ।

स्वयमेव मनः शाम्येन्नीहार इव शारदः ।। ७

स्वसंविद्यत्नसंरोधाद्यथा चेतः प्रशाम्यति ।

न तथाङ्ग तपस्तीर्थविद्यायज्ञक्रियागणैः ।। ८

यच्च संवेद्यते किंचित्तत्तत्संविदि संविदा ।

नूनं विस्मार्यते यत्नाद्भोगानामिति तज्जयः ।। ९

स्वसंवेदनयत्नेन विषयामिषतोऽनिशम् ।

किंचित्संरोधिता संवित्तत्प्राप्तं वैबुधं पदम् ।। १०

स्वधर्मव्यवहारेण यदायाति तदेव मे ।

रोचते नान्यदित्येव पदे वज्रदृढीभव ।। ११

संवित्प्रवृत्तिमर्थेषु विरुद्धेषु विवर्जयन् ।

अर्जयञ्छमसंतोषौ यः स्थितः स जितेन्द्रियः ।। १२

संविद्रसिकतास्वन्तस्तथा नीरसतासु च ।

यस्य नोद्वेगमायाति मनस्तस्योपशाम्यति ।। १३

संवित्प्रयत्नसंरोधान्मनः स्वायनमुज्झति ।

चेतश्चपलतोन्मुक्तं विवेकमनुधावति ।। १४

विवेकवानुदारात्मा विजितेन्द्रिय उच्यते ।

वासनावीचिवेगेन भवाब्धौ न स मुह्यते ।। १५

साधुसंपर्कसच्छास्त्रसमालोकनतोऽनिशम् ।

जितेन्द्रियो यथावस्तु जगत्सत्यं प्रपश्यति ।। १६

सत्यावलोकनाच्छान्तिमेति संसारसंभ्रमः ।

मराविव जलज्ञानं मिथ्यापतनदुःखदम् ।। १७

अचेत्यमेव चिन्मात्रमिदं जगदिति स्थितम् ।

इत्येव सत्यबोधस्य बन्धमोक्षदृशौ कुतः ।। १८

अनाकारं यथा वारि क्षीणं वहति नो पुनः ।

अकारणं तथा दृश्यं ज्ञानच्छिन्नं न रोहति ।। १९

वेदनं व्योममात्रं त्वमहमित्यादिरूपधृक् ।

वर्जयित्वैतदन्यत्स्यादहमित्यादिकं जगत् ।। २०

अविद्यामात्रमेवेदमहमित्यादिकं जगत् ।

चिद्व्योम्न्येव स्थितं शान्तं शून्यमात्रशरीरकम् ।। २१

इदं चिद्व्योम्नि चिच्छाया जगदित्येव भासते ।

शून्यशून्यैव चिच्चासौ शून्या चेत्येव निश्चयः ।। २२

स्वप्नदर्शनदृष्टान्तः केन नामात्र खण्ड्यते ।

असन्मयोऽनुभूतश्च स्वानुभूतोऽप्यसन्मयः ।। २३

सोऽङ्ग संवित्तिमात्रात्मा यद्यद्राज्यं महीयते ।

नकर्तृकर्मकरणं रूपं तद्वज्जगच्चितेः ।। २४

अकर्तृकर्मकरणमहं चिद्घनमात्रकम् ।

जगच्चेदमनिर्देश्यं स्वसंवेदनलक्षणम् ।। २५

यथा स्वप्नेषु मरणमनुभूतं न विद्यते ।

मरौ जलेच्छाऽविद्येयं विद्यमाना न विद्यते ।। २६

चिद्व्योम्ना काचकच्यं स्वं सर्गादौ व्योम्नि चेतितम् ।

जगदित्येव निर्मूलं काकतालीयवत्स्वयम् ।। २७

निर्मूलमेव भातीदमभातमपि भातवत् ।

तस्माद्यद्भासुरमिदं तत्तदेव पदं विदुः ।। २८

जीवादिकचनं त्वत्र यद्भातीदं तदेव तत् ।

शून्यतैव भवेद्व्योम वार्येवावर्तवृत्तयः ।। २९

यथावयविनो रूपमेकं सावयवं भवेत् ।

एकं जीवाद्यवयवं ब्रह्मानवयवं तथा ।। ३०

आभासमात्रं दृश्यात्म चिन्मात्रं शान्तमव्ययम् ।

स्थितमास्थाः किमेतस्मिन्स्वभावे स्वे विचार्यते ।। ३१

नाद्यन्तमन्तःकलनाः काश्चित्सन्ति परे पदे ।

तद्रूपमेवाविद्येयं नाविद्या त्विह विद्यते ।। ३२

जीवः स्वप्नाद्विशञ्जाग्रज्जाग्रतः स्वप्नमाविशन् ।

प्रबुद्धो वास्त्वबुद्धो वाप्येकरूपतया स्थितः ।। ३३

स्थिते सुषुप्ततुर्ये द्वे सदा स्वप्नेऽथ जाग्रति ।

जाग्रत्स्वप्नावेकमेव तुर्यं वेत्ति तु बुद्धधीः ।। ३४

जाग्रत्स्वप्नः सुषुप्तं च सर्वं तुर्यं प्रबोधिनः ।

नाविद्या विद्यते तस्य द्वयस्थोऽप्येव सोऽद्वयः ।। ३५

द्वैतमद्वैतमित्येतदहंत्वमिदमित्यपि ।

निरविद्यस्य कलना कुतः काप्यम्बरं कुतः ।। ३६

द्वैताद्वैतसमुद्भेदैर्वाक्यसंदर्भविभ्रमैः ।

क्रीडन्त्यबुद्धाः शिशवो बोधवृद्धा हसन्ति तान् ।। ३७

द्वैताद्वैतविवादेहा हृदयाकाशमञ्जरी ।

विनैतयेह नोदेति प्रबोधाकाशमार्जनम् ।। ३८

सुहृद्भूत्वा विवादेन द्वैताद्वैतविचारणा ।

कृता हृदयगेहेऽन्तरविद्याभस्ममार्जनी ।। ३९

तच्चित्तास्तद्गतप्राणा बोधयन्तः परस्परम् ।

कथयन्तश्च तन्नित्यं तुष्यन्ति च रमन्ति च ।। ४०

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।

जायते बुद्धियोगोऽसौ येन ते यान्ति तत्पदम् ।।४१

किलोपकुरुते यत्नात्तृणमात्रावगोपने ।

कथं सिध्यत्ययत्नेन त्रैलोक्यगणगोपनम् ।। ४२

अध्यात्मव्यसनोन्मुक्तं ततं हृत्स्थाऽधमाऽप्रभु ।

उपहासास्पदं यस्या जगदप्युत्तमस्थितेः ।। ४३

किं नामेदं किल सुखं यद्राज्यादिमनोङ्कुरम् ।

तत्त्वज्ञानैकविश्रान्तौ देवराजपदं तृणम् ।। ४४

सुप्ताः प्रबुद्धाः पश्यन्ति दृश्यं दृश्ये रता यथा ।

तथा दृश्येऽरताः शान्ताः सन्तः पश्यन्ति तत्पदम् ।। ४५

विना यत्नभरेणेदं न कदाचन सिद्ध्यति ।

महतोऽभ्यासवृक्षस्य फलं विद्धि परं पदम् ।। ४६

इदं बहूक्तमेतेन किमेतेनेति दुर्मतिः ।

न ग्राह्यैतावताप्युक्ते नादत्ते नेदमज्ञधीः ।। ४७

भूयोभूयः परावृत्त्या चिरमास्वाद्यते यदि ।

श्रूयते कथ्यते चेदं तज्ज्ञेनाज्ञेन भूयते ।। ४८

यस्त्वेकवारमालोक्य दृष्टमित्येव संत्यजेत् ।

इदं स नाम शास्त्रेभ्यो भस्माप्याप्नोति नाधमः ।। ४९

इदमुत्तममाख्यानमध्येयं वेदवत्सदा ।

व्याख्येयं पूजनीयं च पुरुषार्थफलप्रदम् ।। ५०

यदस्मात्प्राप्यते शास्त्रात्तत्तद्वेदादवाप्यते ।

अस्मिन्ज्ञाते क्रिया ज्ञानं द्वयं याति पवित्रताम् ।। ५१

वेदान्ततर्कसिद्धान्तस्त्वस्मिन्ज्ञाते च बुध्यते ।

इदमुत्तममाख्यानं व्याख्यातं शास्त्रदृष्टिषु ।। ५२

कारुण्याद्भवतामेतदहं वच्मि न मायया ।

भवन्तस्त्ववगच्छन्ति मायामेतद्विचार्यताम् ।। ५३

अस्माच्छास्त्रवराद्बोधा जायन्ते ये विचारितात् ।

लवणैर्व्यञ्जनानीव भान्ति शास्त्रान्तराणि तैः ।। ५४

अनार्यमिदमाख्यानमित्यनादृत्य दृश्यधीः ।

मा भवंत्वात्महन्तारो भवन्तो भवभागिनः ।। ५५

तातस्य कूपोऽयमिति ब्रुवाणाः

क्षारं जलं कापुरुषाः पिबन्ति ।

यथा भवन्तो विविचारवन्त-

स्तथानिशं मा भवताज्ञताप्त्यै ।। ५६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निवा० उ० इन्द्रियजयोपायशास्त्रवर्णनं नाम त्रिषष्ट्यधिकशततमः सर्गः ।। १६३ ।।